International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 252-255
© 2024 IJSR
www.anantaajournal.com
Received: 08-04-2024
Accepted: 12-05-2024

**B Mohan Kumar**
Research Scholar, National Sanskrit University, Tirupati, Andhara Pradesh, India

**Corresponding Author:**
Research Scholar, National Sanskrit University, Tirupati, Andhara Pradesh, India

# अभिराजयशोभूषणे गलज्जलिकायाः स्वरूपविवेचनम्

**B Mohan Kumar**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i3d.2399

**सारांशः**
विश्वेऽस्मिन् विश्वे प्रायः सर्वमपि वस्तु परिवर्तनशीलं नित्यनूतनं च प्रतिभाति। एवमेव काव्याङ्गनाऽपि विविधशैलीः प्राप्य सहृदयहृदयाह्लादं जनयति। यथा कस्यचिद् नूतनवस्तुनः विशेषतां ज्ञापयितुं तस्य लक्षणं आवश्यकं तथैव एतासां नूतनप्रक्रियाणां शैलीनां अवगाहनार्थं आस्वादार्थं निर्माणार्थं च लक्षणम् अत्यन्तमपेक्षितं वर्तते। अत एव अभिराजराजेन्द्रमिश्राः एतच्छास्त्रसम्बद्धानां सर्वेषां एतासु नवीनशैलीषु रुचिं वर्धापयितुं अभिराजयशोभूषणम् इति आधुनिकसाहित्यलक्षणग्रन्थं निर्माय परम्परागतसाहित्यप्रकारैः सह एतासां नवीनप्रक्रियाणामपि सम्यक्प्रतिपादनम् अकुर्वन्। तेष्वस्मिन् शोधप्रबन्धे गलज्जलिकायाः विवेचनं क्रियते। संस्कृतसाहित्ये गलज्जलिका इति पदं, गजल-वाचकम्। राजेन्द्रमिश्रेणैव प्रथमतया गजलस्य कृते गलज्जलिका इति संज्ञा उपकल्पिता।भारते मुगलशासनकाले अनया साहित्यप्रक्रियया भारतीयसहित्यकाराः प्रभाविताः सञ्जाताः। फलतः फारसीभाषायाः अनन्तरं गजलानि उर्दूभाषायाम् अपि लोकप्रियाः अभवन्। अभिराजराजेन्द्रमिश्रः उल्लिखति यत् संस्कृतगलज्जलिका केवलं फारसीगजलानां संविधानकमात्रमनुसरणं करोति, न तु तेषां साहित्यम् इति। एवम् अभिराजराजेन्द्रमिश्रः गलज्जलिकेत्यादीनां लक्षणम् कृत्वा सहृदयेभ्यः नूतनसाहित्यप्रक्रियानाम् परिचयं अददात्।

**कूटशब्द :** गलज्जलिका, गलज्जला, गजल्, कजरी, छन्दोमुक्तकाव्यम्, मतला, मक्ता, सेरा

## प्रस्तावना

विश्वेऽस्मिन् अपारे संस्कृतवाङ्मये सकलमपि शास्त्रजातं लक्ष्यलक्षणसमन्वयात्मकं भवति। एवमेव साहित्यशास्त्रमपि। तत्र लक्ष्याणि(काव्यानि) दृश्यश्रव्यादिभेदैः भिन्नानि। तदाधारीकृत्यैव लक्षणग्रन्थाः निर्मीयन्ते। साहित्यशास्त्रे केवलं लक्षणात्मकग्रन्थाः यथा नाट्यशास्त्रादयः। लक्ष्यलक्षणसमन्वयात्मकग्रन्थाः यथा काव्यप्रकाशादयः एवं क्रमः परिलक्ष्यते। तत्रापि द्वितीये भेदे लक्ष्यलक्षणानि स्वोपज्ञानि भवन्ति इत्यपि ज्ञायते यथा रसगङ्गाधरादीनि। तथापि विशिष्टतया एकमेव कथावस्तु, नायकं वा स्वीकृत्य स्वोपज्ञलक्षणानां स्वोपज्ञलक्ष्येष्वेव समन्वयं कृत्वा रचिताः ग्रन्था केचन दृश्यन्ते यथा प्रतापरुद्रयशोभूषणम्। अयं ग्रन्थः विद्यानाथेन विरचितः ततः आरभ्य साहित्यशास्त्रे यशोभूषणग्रन्थपरम्परा सञ्जाता। तत्पश्चात् अनेके साहित्यशास्त्रकाराः यशोभूषणग्रन्थान् रचितवन्तः। यथा नञ्जराजयशोभूषणम्, श्रीमदभिनवविद्यातीर्थयशोभूषणम् इत्यदि। अस्यामेव परम्परायाम् अभिराजरजेन्द्रमिश्रविरचितम् अभिराजयशोभूषणमपि राजते।

समकालीनकाले अनेके नवीनसाहित्यरूपाः संस्कृतसाहित्ये प्रादुर्भूताः सन्ति। नूतनविषयैः शैलीभिश्च एते रूपाः पाठकानां मनांसि आनन्ददोलिकासु विहारयन्ति। गलज्जलिका छन्दोमुक्तकाव्यम् इत्यादीनि नूतनसंस्कृतसाहित्यरूपाणां महत्त्वपूर्णोदाहरणानि भवन्ति। आधुनिक-संस्कृत-अलङ्कारशास्त्रज्ञः अभिराजराजेन्द्रमिश्रः एतासाम् नूतनसाहित्यप्रक्रियानां सम्यक्प्रतिपादनं स्वकीये अभिराजयशोभूषणे अकरोत्।

**गलज्जलिका**

संस्कृतसाहित्ये गलज्जलिका इति पदं गजल-वाचकम्।भारते मुगलशासनकाले अनया साहित्यप्रक्रियया भारतीयसहित्यकाराः प्रभाविताः सञ्जाताः [1]। फलतः फारसीभाषायाः अनन्तरं गजलानि उर्दूभाषायाम् अपि लोकप्रियाः अभवन्। अद्यत्वेपि अस्याः शैल्याः महती माङ्गलिका वर्तते। संस्कृते तु गलज्जलिका भट्टमथुरानाथशास्त्री तथा आचार्य बच्चूलाल अवस्थी इत्येताभ्यां विकसिता इति मिश्रमहोदयाः कथयन्ति।यतः तयोः फारसीभाषायां संस्कृतभाषायाञ्च उत्तमा प्रज्ञा आसीत्। भट्टमथुरानाथस्य साहित्यवैभवम्, गीतवीथी इति ग्रन्थौ गलज्जलिकाभूयिष्ठौ भवतः [2]।

राजेन्द्रमिश्रेणैव प्रथमतया गजलस्य कृते गलज्जलिका इति संज्ञा उपकल्पिता[3]। पुनः पुनः गजलश्रवनं कृत्वा हर्षविषादाभ्यां प्रभावितः सहृदयः नूनम् अश्रुपातं करोति।तत एव इयम् गीतिः मिश्रमहोदयैः गलज्जलेति आख्याता। सा एव गलन्नेत्रजलत्वाद्वा गलज्जलिकेत्यपि संज्ञिता भवति।

श्रावं श्रावं च गीतार्थं नयने वारि वर्षतः।
ध्रुवं हर्षविषादाभ्यां सचेता यदि पाठकाः[4]॥
तत एव माया गीतिराख्यातेयं गलज्जला।
गलन्नेत्रजलत्वाद्वा सा गलज्जलिका पुनः [5]॥

अथ चायं गजलः विविधबन्धविस्तरः दृश्यते। फारस्यां बन्धस्य दीर्घताप्रदर्शकः बहर इति व्यवहृतोस्ति।सत्कवेः प्रयोगक्षमतादर्शी अयं बहरः क्वचित् लघीयान् कुत्रचित् द्राघीयान् च दृश्यते। संस्कृते गणानां यादृशीस्थितिः तथैव बहरेऽपि कश्चित् रम्यः गणक्रमः वर्तते।कुत्रचिच्च सः गणक्रमः मुत्कारबे, मुसम्मन, सालिम इति क्वचिच्च बहरे, कामिल, मुसम्मन इत्युच्यते।एषु बहरेषु मफऊल, फऊलून, फाइलुन् इति गणाः प्रसिद्धाः सन्ति।अत्र कस्मिन् गणे कः गणक्रमः प्रयोक्तव्यः इत्यपि फारसीच्छन्दश्शास्त्रे सुनिश्चितो वर्तते।

गजलस्य त्रयः भागाः भवन्ति यथा- मतला मक्ता सेरा च। फार्सीभाषायाम् गजलस्य मूलभावप्रकाशकं आरम्भवाक्यं मतला इति उच्यते।

गजलारम्भि यद्वाक्यं मूलभवप्रकाशकम्।
तदेव फारसीवाचि मतलेति समुच्यते[6]॥

पुनः गजलेऽन्तिमम् वाक्ययुगलम् यत्र कवेः नाम भवति सः मक्तः [7] इति उच्यते, मातला मक्तयोः मध्ये यानि वाक्यानि अन्यैः भिन्नभिन्नप्रयोजनैः सह गजलस्य मूलविषयम् विकासयन्ति तानि शेर इत्युच्यन्ते [8]। एवं गजलस्य त्रयः भागाः सन्ति। संस्कृतगलज्जलिकायां केवलं फार्सीगजलानां त्रयाणां भागानां नामपरिवर्तनं कृतम्, परन्तु भागानां प्रयोजनम् उभयभाषासु समानं तिष्ठति।

गलज्जलिकायां मताला मक्ता शेरा च क्रमशः आरम्भिका अन्त्यिका मध्यिका इति उच्यन्ते।

मतलाऽरम्भिका वाच्य शेर उच्येत मध्यिका।
अन्त्यिका च तथैवास्तु मकतेति मतम्मम[9] ॥

गलज्जलिकायाः एषां भागानां स्पष्टावगमार्थम् अभिराजराजेन्द्रमिश्रः आचार्यबच्चुलालअवस्थि महोदयस्य गलाज्जालिकाम् उदाहरति

तत्र आरम्भिकायाः उदाहरणम् यथा
पिकाः कूजन्ति माकन्देषु कूजेयुः किमायतम् ?
समीरा दक्षिणात्या मन्दमञ्चेयुः किमायतम्[10]?

[1] गजलाख्यं हि तद्गीतं भारतेपि प्रतिष्ठितम्।
तुरुष्कशासने जाते पारसीके प्रतिष्ठिते॥ अभिराजयशोभूषणम् 5/53

[2] अभिराजयशोभूषणम् पृ. सं 280

[3] अभिराजयशोभूषणम् पृ.सं 283

[4] अभिराजयशोभूषणम् 5/66

[5] अभिराजयशोभूषणम् 5/67

[6] अभिराजयशोभूषणम् 5/75

[7] अन्तिमश्चापि यो बन्धः कविर्नामाङ्कितः खलु।
सोऽपि गजलतत्वज्ञैर्मततेति निगद्यते॥(अभिराजयशोभूषणम् 5/76)

[8] मतलामक्तयोर्मध्ये मूलभावैकपोषिणः।
बन्धाःभिन्नाशया वापि कथिताः शेरसंज्ञकाः॥ (अभिराजयशोभूषणम् 5/77)

[9] अभिराजयशोभूषणम् 5/80

तस्मिन्नेव गलज्जलिकायां मध्यिकोदाहरणं यथा -
इदं पाणौ सुरपात्रं सुरा कुम्भेऽन्तिके रामा।
उदन्वन्तः समे सर्वत्र शुशयेयुः किमायातम्[11] ?
अतन्त्रं लोकतन्त्रं वा विवादो नामनि व्यर्थः
सुमन्त्रा यन्त्रिके तन्त्रे न सिध्येयुः किमायतम्[12]?
स्वतन्त्रत्वं भजेल्लोकः स्वतन्त्रत्वं परो धर्मः
युवानो यौवतं सम्भूय दिव्येयुःकिमायतम्[13]?

आरम्भिकायां कविः बच्चुलालअवस्थिः वर्तमानसमाजस्य व्यक्तीनाम् स्वार्थचिन्तनं सौन्दर्यास्वादविमतित्वञ्च प्रकटयति। मध्यिकायां कविः भौतिकवादजीवनपद्धतेः विध्वंसकरप्रभावं वर्णयति।एवं तस्यामेव गलज्जलिकायाम् अन्तिकायाः उदाहरणम् यथा

न हि ज्ञानेन सिध्यत्यर्था इत्याश्रित्य विज्ञानम्।
कदर्या आर्यमर्यादाम् विलुम्पेयुः किमायातम्[14] ?

अस्याम् अन्तिकायां कविः बच्चुलाल अवस्थिः अस्माकं जीवने लक्ष्यं प्राप्तुं प्रज्ञायाः माहात्म्यं सूचयति |अत्र ज्ञान इति कवेः उपनाम।अन्तिकाचेयम् तेनाङ्किता।संस्कृते अनेके कवयः उपनामाप्रयुञ्जानाः अपि दृश्यन्ते।अतः अस्माभिः एतत्तु कविस्वातन्त्र्यमेवेति ज्ञेयम्।
अभिराजराजेन्द्रमिश्रः उल्लिखति यत् संस्कृतगलज्जलिका केवलं फारसीगजलानां संविधानकमात्रमनुसरणं करोति, न तु तेषां साहित्यम्

संविधानकमात्रं हि फरसीगजलाश्रितम्।
ग्राह्यम् न च प्रतिपद्यामित्यभिराजसम्मतम् [15] ॥

यथा संस्कृतम् उर्दू चेति द्वे भाषे भिन्न-भिन्न-संस्कृतीनां, भिन्नसमाजानां च प्रतिबिम्बे भवतः, अतः विषयचित्रणविषये गलज्जलिका गजलश्चेति द्वावपि स्वतन्त्रावेव।

पिङ्गलादिभिराचार्यैः लौकिकं च्छन्दः मात्रावर्णविभागेन द्विधा कथ्यते।एषु प्रकारेषु वृत्तच्छन्दांसि अक्षरप्रधानानि, जातिच्छन्दांसि च मात्राप्रधानानि भवन्ति।मात्राप्रधानेषु आर्यादिषु जातिच्छन्दस्सु मात्रागणनाधारेणैव लघुगुरुभावो विचार्यते न तु अक्षराणां गुरुलघुभावविवक्षया।यद्यपि गलज्जलिकेयं मात्राप्रधाना भवति तथापि मात्राच्छन्दस्सु इव अत्र पञ्चगणविभागेत्यादि न भवति (अर्थादत्रकेवलं मात्राणां संख्या एव प्रधानम्)। संस्कृते ह्रस्वदीर्घाधारेण मात्रानिर्णयः भवति।

वृत्तरत्नाकरे लधुगुरुलक्षणम् यथा
सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।
वा पदान्ते त्वसौ वक्रो ज्ञेयोन्यो मात्रिको लृजुः[16] ॥
छन्दोमञ्जर्यां मात्रानिर्णययुक्तिः यथा
एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते |
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनश्चार्धुमात्रकम्[17]||

राजेन्द्रमिश्रस्य शालभञ्जिकातः चतुर्दशमात्रायाः गलज्जलिकायाः उदाहरणं यथा

सत्यरक्षणे यत्नपरः
श्रुतिकटुदोषो गिरोऽभवम्[18] ॥
शक्तिर्मिता धराऽनन्ता
धावन्धावन् स्थिरोऽभवम्[19] ॥
चरितं दृष्ट्वा पुरोधासां
परित्यक्तमन्दिरोऽभवम्[20] ॥
रक्तं लिखितं भालालिपौ
यतः कालिकाऽजिरोऽभवम्[21] ॥
का मेऽपूर्णतया हानिः
शिवभाले चन्दिरोऽभवम्[22] ॥
अभिराजश्शारदाऽऽत्मजः
रसगुणधमनीशिरोऽभवम्[23] ॥

---

[10] अभिराजयशोभूषणम् पृ. सं 287
[11] अभिराजयशोभूषणम् पृ. सं 287
[12] अभिराजयशोभूषणम् पृ. सं 287
[13] अभिराजयशोभूषणम् पृ. सं 288
[14] अभिराजयशोभूषणम् पृ. सं 288
[15] अभिराजयशोभूषणम् 5/85
[16] वृत्तरत्नाकरः 1/9
[17] छन्दोमञ्जरी पृ. सं 3
[18] अभिराजयशोभूषणम् पृ. सं 292
[19] अभिराजयशोभूषणम् पृ. सं 292
[20] अभिराजयशोभूषणम् पृ. सं 292
[21] अभिराजयशोभूषणम् पृ. सं 292
[22] अभिराजयशोभूषणम् पृ. सं 292
[23] अभिराजयशोभूषणम् पृ. सं 292

उपर्युक्तायां गलज्जलिकायां प्रत्येकं पङ्क्तिः चतुर्दशमात्राः धारयति। अतः राजराजेन्द्रमिश्रस्य एषा चतुर्दशमात्रागलज्जलिका भवति। राजेन्द्रमिश्रस्य त्रयः गलज्जलिकासंग्रहाः सन्ति – कनीनिका, मत्तवारिणी शालभञ्जिका। येषु कनीनिकायां त्रिपञ्चाशत्, मत्तवारिण्यां षष्टिः, शालभञ्जिकायाम् अष्टषष्टिः गलज्जलिकाः सन्ति।

## उद्देश्यम्

एवम् अभिराजराजेन्द्रमिश्रः गलज्जलिकेत्यादीनां लक्षणम् कृत्वा सहृदयेभ्यः नूतनसाहित्यप्रक्रियानाम् परिचयं दत्वा एवमादिषु नूतनसाहित्यप्रक्रियास्वपि तेषाम् अभिरुच्युत्पादनं पठनौन्मुख्यं रचनौन्मुख्यं च सम्पादयति॥

## सन्दर्भ

1. Abhirajayasobhusanam of Prof. Abhiraja Rajendra Mishra, Vijayanta Prakashan, Allahabad; c2006.
2. Vrittaratnakara of Kedarabhatta, ed. Acharya Baladev Upadyay, Chaukhamba Surabharati Prakashan, Varanasi.
3. Chandomanjari of Gangadas, ed. By Dr. Brahmananda Tripathi, Chaukhamba Surabharati Prakashan, Varanasi.